# मन्त्र पुष्पम्

यो॑ऽपां पुष्पं॒ वेद॑ पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । च॒न्द्रमा॒ वा
अ॒पां पुष्पम्॑ । पुष्प॑वान् प्र॒जावा॑न् पशु॒मान् भ॑वति । य ए॒वं वेद॑ ।
यो॑ऽपामा॒यत॑न॒ं वेद॑ । आ॒यत॑नवान् भवति ।

अ॒ग्निर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो॒॑ग्नेरा॒यत॑न॒ं वेद॑ ।
आ॒यत॑नवान् भवति । आपो॒वा अ॒ग्नेरा॒यत॑नम् । आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑न॒ं वेद॑ । आ॒यत॑नवान् भवति ।

वा॒युर्वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यो वा॒योरा॒यत॑न॒ं वेद॑ ।
आ॒यत॑नवान् भवति । आपो॒ वै वा॒योरा॒यत॑नम् । आ॒यत॑नवान् भवति ।
य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑न॒ं वेद॑ । आ॒यत॑नवान् भवति ।

अ॒सौ वै तप॑न्नपा॒मायत॑नम् आ॒यत॑नवान् भवति । यो॑ऽमुष्य॒तप॑त
आ॒यत॑नं वेद॑ । आ॒यत॑नवान् भवति । आपो॑ वा अ॒मुष्य॒तप॑त आ॒यत॑नम्
।आ॒यत॑नवान् भवति । य एवं वेद॑ । यो॑ऽपामा॒यत॑न॒ं वेद॑ ।
आ॒यत॑नवान् भवति ।

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः च॒न्द्रम॑स
आ॒यत॑नं वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै च॒न्द्रम॑स आ॒यत॑न॒म् ।
आ॒यत॑नवान् भवति । य एवं वेद॑ । यो॑ऽपामा॒यत॑न॒ं वेद॑ । आ॒यत॑नवान्
भवति ।

नक्ष॑त्राणि॒ वा अ॒पामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । यो॑ नक्ष॑त्राणामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै नक्ष॑त्राणामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽ॒पामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः प॒र्जन्य॑स्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै पर्जन्यस्या॒यत॑न॒म् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽ॒पामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

सं॒व॒त्स॒रो वा अ॒पामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । यः सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । य एवं वेद॑ । यो॑ऽप्सु नावं॒ प्रति॑ष्ठिता॒ं वेद॑ । प्रत्ये॒व ति॑ष्ठति ।

ॐ रा॒जा॒धि॒रा॒जाय॑ प्रस॒ह्य सा॒हिने॑ । नमो॑ व॒यं वै॑श्रव॒णाय॑ कुर्महे । स मे॒ कामा॒न् काम॒ कामा॑य॒ मह्य॑म् । का॒मे॒श्व॒रो वै॑श्रव॒णो द॑दातु । कु॒बे॒राय॑ वैश्रव॒णाय॑ । म॒हा॒रा॒जाय॒ नमः॑ ।

ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा ।
ओं तद्सत्यम् । ओं तत्सर्वम् । ओं तत्-पुरोर्नमः ॥

अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु
त्वं यज्ञस्त्वं वषट्कारस्त्व-मिन्द्रस्त्वगं
रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं॑ प्रजापतिः ।
त्वं तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

ईशानस्सर्व विद्यानामीश्वर स्सर्वभूतानां
ब्रह्माधिपतिर्-ब्रह्मणॊऽ॒धिपतिर्-ब्रह्मा शिवॊ मॆ अस्तु सदा शिवॊम् ।

तद्विष्णॊः परमं पदगं सदा पश्यन्ति
सूरयः दिवीवचक्षु राततं तद्वि प्रासॊ
विपस्यवॊ जागृहान् सत्समिन्धतॆ
तद्विष्णॊर्य-त्परमं पदम् ।

ऋतगं स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रुषं᳚ कृष्ण॒पिङ्ग॑लम् ।
ऊ॒र्ध्व॑रेतं वि॑रूपा॑क्षं॒ वि॒श्वरू॑पाय॒ वै नमॊ॒ नमः᳚ ॥

ॐ ना॒रा॒य॒णाय॑ वि॒द्महे᳚ वासु॒दॆवाय॑ धीमहि ।
तन्नॊ॑ विष्णुः प्रचॊ॒दयो॑त् ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः᳚ ।